नदोषकरमिति मावं न याचस्व तिः मनसा पावनतु दिश्यजलमध्ये जलं क्षिपेत दाता तत्फलमाप्नोति प्रतिग्राही न दोषभाक् इति ७७ स्वर्गमिति [illegible]
[illegible] न हीयत इत्यर्थः ८३ ॥ ॥ ॥

78

द्वौ पुरुषौ कामक्रोधौ ८७ प्रार्थनाहिराज्ञोऽ ननु त्वयेति तस्य कामो विकृतसंज्ञः शांतिस्वभावस्य पित्र्यापकस्य याचिलापिदीयमानं न गृह्णातीति राजानं प्रति

भीष्म उवाच ततो विकृतचेष्टौ द्वौ पुरुषौ समुपस्थितौ गृहीत्वान्योन्यमावेष्ट्य कुचैलावूचतुर्वचः ८४ न मे धारयसीत्येको धारयामी
ति चापरः इहास्ति नौ विवादोयमयं राजानुशासकः ८५ सत्यं ब्रवीम्यहमिदं न मे धारयते भवान् अनृतं वदसीह त्वमृणं ते धारयाम्य
हं ८६ तावुभौ भृशसंतप्तौ राजानमिदमूचतुः परीक्षतां यथा स्याव नावामिह विगर्हितौ ८७ विरूप उवाच धारयामि नरव्याघ्र वि
कृतस्येह गोः फलं ददतश्च न गृह्णाति विकृतो मे महीपते ८८ विकृत उवाच न मे धारयते किंचिद्विरूपोयं नराधिप मिथ्या
ब्रवीत्ययं हि त्वां सत्याभासं नराधिप ८९ राजोवाच विरूप किं धारयते भवानस्य ब्रवीतु मे श्रुत्वा तथा करिष्येहमिति मे धीयते
मनः ९० विरूप उवाच शृणुष्वावहितो राजन्यथैतद्धारयाम्यहं विकृतस्यास्य राजर्षे निखिलेन नराधिप ९१ अनेन धर्मप्रा
प्त्यर्थं शुभा दत्ता पुरानघ धेनुर्विप्राय राजर्षे तपःस्वाध्यायशीलिने ९२ तस्यास्तायं मया राजन्फलमभ्येत्य याचितः विकृते
न च मे दत्तं विशुद्धेनांतरात्मना ९३ ततो मे सुकृतं कर्म कृतमात्मविशुद्धये गावौ च कपिले क्रीत्वा वत्सले बहुदोहने ९४

क्रोधः सत्त्वविरूपसंज्ञः गोः फलं वा वं धेनुमुपासीतेति श्रुतेर्धेनुसत्त्वापापावाचः जपस्य फलमित्यर्थः ९२ धेनुर्वाक् विप्राय परमेश्वराय धर्मप्राप्त्यर्थं न तु स्वार्थं ९३

५१

ततोमे मया पृष्ठ हृदयेयद्दानेनमयात्तपयत्तफलं प्रासं इदानीमस्मात्तदहं नेच्छामीसर्थः ९५ इहेतिप्रतिगत्यापिपुनः प्रतिदानंकरिष्यामीत्यर्थः ९९ धारयामीति

तेचांछदत्तंयेराजन्मयासममपवर्जिते मयाविधियथाश्रद्धांतदस्माहंपुनः प्रभो ९५ इहाधेवगृहीत्वात्तदपच्छेद्विगुणंफलं एवं सात्तरुषषाबाधकः शुद्धः कोत्रदोषवान् ९६ एवंविवदमानोसत्वामिहाभ्यागतोनृप कुरुधर्ममधर्मंवाविनयेनोसमासव ९७ यदिनेच्छतिमेदानंयथादत्तमनेनवै भवानत्रस्थिरीभूत्वामार्गेस्थापयपितापुनौ ९८ [illegible] राजोवाच दीयमानेनगृह्णासिकर्णोकस्मात्त्वमधवे यथैवतेभ्यनुज्ञातंतथागृह्णीष्वमाचिरं ९९ विकृतउवाच धारयामीत्यनेनोक्तंददानीति तथामया नापिमेधारयत्यघगच्छतांपत्रवांछति १०० राजोवाच ददतोस्यनगृह्णासिविषमंप्रतिभातिमे दंड्योहित्वंमममतोनास्त्यत्रखलुसंशयः १ विकृतउवाच मयास्यदत्तंराजर्षेगृह्णीयांतत्कथंपुनः काममत्रापराधोमेदंडमाज्ञापयप्रभो २ विकृतउवाच दीयमानंयदिमयानेषिष्यसिकथंचन नियंस्यामित्वोनृपतिरयंधर्मानुशासकः ३ विकृतउवाच स्वं मयायाचितेनेहदत्तंकथमिहाधुनात् गृह्णीयांगच्छतुभवानभ्यनुज्ञांददानिते ४ ब्राह्मणउवाच श्रूतेमेनत्वयाराजन्नन योःकथितंद्वयोः प्रतिज्ञातंमयायत्तेनद्गृहाणाविचारितं ५ ५ ५ ५ ५

प्रतिग्रहेशेवाहमेतमनुशांकरोमीत्यर्थः १०० १ २ ३ ४ ॥ ॥

मो०
७९

79

निक्षेपार्थे प्रतिगृह्य प्रदानार्थे १३ समं दानस्य प्रदानेन तत्सममस्तु सहैवेति तैवं च नमं मया प्रतिप्रदानमित्यर्थः १४ कामक्रोधाविति । अत्र प्रतिगृहीत्वरमपि

राजोवाच यत्कृतं सुमहत्कार्यमनयोर्गह्वरं यथा ज्ञापकस्सहटीकारः कथमेतद्भविष्यति ६ यदि तावत्त्वया त्यक्तामिवाह्मणोत्मा
प्रवर्जितं कथं न लिप्येयमहं पापेन महता ध्रुवं ७ तोचोवाच स राजर्षिः कृतकार्यो गमिष्यथः नेदानीमामिहामाध राजवर्मो
भवेन्मया ८ स्वधर्मः परिपाल्यस्तु राज्ञामिति विनिश्चयः विप्रधर्मस्त्व गहनो मामनात्मानमाविशत ९ ब्राह्मणा ऊचुः
गृह्णाण धारयेहं च याचितं संस्कृतं मया नचेद्गृह्णीष्यसे राजन् न शपिष्ये त्वां न संशयः १० राजोवाच श्रियाजधर्मेयस्यापं कार्य
सेह विनिश्चयः इमं सर्थमे गृह्णीत अंक कथं तत्स्यमवेदिति ११ एष पाणिः पूर्वमेनिक्षेपार्थे प्रसारितः यन्मे धारयसे विप्र त
दिदानीं प्रदीयतां १२ ब्राह्मणा ऊचुः संहितां जपता यावान्गुणाः कश्चित्कृतो मया तत्सर्वं प्रतिगृह्णीष्व यदि कि
चिदिहास्ति मे १३ राजोवाच जलमेतन्निपतितं मम पाणौ द्विजोत्तम सममस्तु सहैवास्तु प्रतिगृह्णातु वै भवान् १४
विरूप उवाच कामक्रोधौ विद्धि नौ त्वमावाभ्यां कारितो भवान् सहेति च यदुक्तं ते समा लोकास्तवास्य च १५ ॥ ॥

कारितत्वाद्दोनर्हानसममेव प्रणयं त्वमथा पुण्यप्रदानेन बहुगुणा पुण्य पाहिरे वसादितिभावः कारितः प्रवर्त्तितः तत्पदार्थः राजान्न संबोध्यः ॥ ॥

एम०
७९

नायमिति आख्यापिकानां सर्वमाह त्वत्कृते राज्ञो बोधार्थं १६ निदृष्टं परीक्षितं १७ भीष्म उवाच जापकानामिति गतिर्मुक्तिः स्थानं ब्रह्मलोकः लोकाः सूर्या
दिस्थानानि एते यथा जितास्तथा कीर्तयिष्ये इति शेषः १८ तेषु स्थानमाह प्रयातीति विरक्तस्य फलमुक्त्वा रागिणां लोकानाह त्र्यथेति अग्निं अग्निलोकं
एवमुत्तरत्र १९ तैजसेन तेजोमयेन स्वप्रदेहेन २० भूमिशरीरे घनेपि गच्छति तथा आकाशशरीरे निरालंबेपि गच्छति । तेषां सूर्यादिलोकपालानां

नावधारयते किंचिज्जिज्ञासा त्वत्कृते कृता कालो धर्मस्तथा मृत्युः कामक्रोधौ तथा युवां १६ सर्वमिमोमनिक्षे निदृष्टं प्राप्य
तत्त्वं गच्छ लोकान्जितान्स्वेन कर्मणा यत्र वांछसि १७ भीष्म उवाच जापकानां फलावाप्तिर्मया ते संप्रदर्शिता गतिः
स्थानं च लोकेस्मिन्जापकेन यथा जिता १८ प्रयाति संहिताध्यायी ब्रह्माणं परमेष्ठिनं अथवाग्निं समायाति सूर्यं वा विश
तेपि वा १९ सतैजसेन भावेन यदि तत्रारमत्युत गुणांस्तेषां समाधत्ते रागेण प्रतिमोहितः २० एवं सोमे तथा वायौ भूम्या
काशशरीरगः सरागस्तत्र वसति गुणांस्तेषां समाचरन् २१ अथ तत्र विरागी स गच्छति त्वथ संशयः परमव्ययमिच्छन्स तमेवा
विशते पुनः २२ अमृताच्चामृतं प्राप्तः शीतीभूतो निरात्मवान् ब्रह्मभूतः स निर्द्वंद्वः सुखी शांतो निरामयः २३ ॥ ॥

गुणान्प्रकाशकत्वादीन् २१ अथेति तत्राग्न्यादौ तमेव परमेष्ठिनमेव परं उत्कृष्टं अव्ययं मोक्षकमतः इच्छन् २२ अमृतात्परमेष्ठीभावात् आयेक्षिका
मृता अमृतं कैवल्याख्यं मुख्यामृतं शीतीभूतः निष्कामः निरात्मवान् आत्मबुद्धिः तद्वान् अहंकारस्तद्वर्जितः अत एव ब्रह्मभूतः निर्द्वंद्वः सुखदुःखादीनी

[illegible] २३

अतैवस्थानं ब्रह्मस्थानं अनाहतं आहतिम्मूलं २४ चतुर्भिः प्रत्यक्षागमानुमानवेदोक्तिभिः लक्षणैः लक्ष्यते नेत्यनेतिसमस्ता ज्ञापकैः हीनं ह्रस्वगुरुसंबंधजरत्वा
दिभिः द्वैतैक्यैर्विरहितं। अत एव षड्भिरूर्मिभिः अशनायापिपासाभ्यां प्राणधर्माभ्यां शोकमोहाभ्यां चित्तधर्माभ्यां जरामरणाभ्यां देहधर्माभ्यां च हीनं तदमला
त् अत एव प्राणाद्यात्मकषोडशकगुणैर्नैव तैः शब्दादयः सहितास्तैः प्राणप्राणश्रद्धाखंवायुर्ज्योतिरापपृथ्वीन्द्रियमनोऽन्नमन्नाद्वीर्यंतपोमंत्राः कर्मलो

ब्रह्मस्थानमनावर्त्तमेकमक्षरसंज्ञकं अद्धः खमजरं शांतं स्थानं तत्प्रतिपद्यते २४ चतुर्भिर्लक्षणैर्हीनं तथा षड्भिः सषो
डशैः पुरुषं तमतिक्रम्य आकाशं प्रतिपद्यते २५ अथ नेच्छति रागात्मा सर्वं तदधितिष्ठति पंचप्रार्थयते तेत्वमेनसा प्र
तिपद्यते २६ अथ वा वेक्षते लोकान् सर्वान्निरयसंज्ञितान् निस्पृहः सर्वतो मुक्तस्तत्रैव रमते सुखं २७ एवमेषा महारा
ज जापकस्य गतिर्यथा। एतत्ते सर्वमाख्यातं किं भूयः श्रोतुमिच्छसि २८ शांतौ मोक्षधर्मेषु जापकोपाख्याने॥ ॥

केषु नामेवेति अत्युक्तः आकाशं कारणं ब्रह्मातिक्रम्य पुरुषमनुपाधि चिन्मात्रं प्रतिपद्यत इति संबंधः २५ नेच्छति पुरुषप्राप्तिमिति शेषः सर्वं सर्वात्मकं तत्तदाका
शाख्यं कारणं। अधितिष्ठति तदभिमानी भवति यद्वा मनेनसा यदि पितृलोककामो भवति संकल्पादेवास्य पितरः समुत्तिष्ठंतीत्यादिश्रुतेरर्थः सत्यकामः सत्यसंक
ल्पश्च। विद्वानिति शेषः २६ अथवेति परवैराग्यवतः सर्वलोकस्वाम्योपि भवतीत्याह। तत्रेति निर्गुणे २८ पंचविंशः॥ ॥ ॥ ॥ ॥

किमितिउत्तरं समालोकात्तथा संचेतिति विरूपवाक्यश्रवणानंतरं तौ इक्ष्वाकुपैप्पलादी तस्य विरूपस्य भाषिते वचने विषये १ यदेतत सद्योमुक्तिक्रमभक्तिलोकी

युधिष्ठिरउवाच किमुत्तरं तदा तौ स्म चक्रतुस्तत्र भाषिते ब्राह्मणो वाथवा राजा तन्मे ब्रूहि पितामह १ अथवा तौ गतौ तत्र यदेतत्कीर्तितं त्वया संवादो वा तयोः कोऽभूत्किं वा तौ तत्र चक्रतुः २ भीष्मउवाच तथेत्येवं प्रतिश्रुत्य धर्मं संपूज्य च प्रभो यमं कालं च मृत्युं च स्वर्गं संपूज्य चार्हतः ३ पूर्वं ये चापरे तत्र समेता ब्राह्मणर्षभाः सर्वान्संपूज्य शिरसा राजानं सोऽब्रवीद्द्विजः ४ फलेनानेन संयुक्तो राजर्षे गच्छ मुख्यतां भवता चाभ्यनुज्ञातो जपेयं भूय एव ह ५ वरश्च मम पूर्वं हि दत्तो देव्या महाबल श्रद्धा ते जपतो नित्यं भवित्विति विशांपते ६ राजोवाच यद्येवमफला सिद्धिः श्रद्धा च जपितुं तव गच्छ विप्र मया सार्धं जापकं फलमाप्नुहि ७ ब्राह्मणउवाच कृतः प्रयत्नः सुमहान्सर्वेषां संनिधाविह सह तुल्यफलावावां यत्र तौ गतिः ८ व्यवसायं तयोस्तत्र विदित्वा त्रिदशेश्वरः सह देवैरुपययौ लोकपालैस्तथैव च ९ साध्याश्च विश्वे मरुतो वाद्यानि सुमहांति च नद्यः शैलाः समुद्राश्च तीर्था-

नि विविधानि च १० ॥

वांगच्छवो २

तरघासिरितित्रयं २ अर्हतः पूज्यान् ६ यद्यपि अफला तावत् यद्यपि मत्संपलसत्वात् तथापि जपे श्रद्धा ननु पृणेपनैव तत्र फलहेतुः जनितत्वात् जापकं जपार्जितं

फलं त्वमपि प्राप्नुहीत्यर्थः प्रयत्नः तत्र जपदानार्थनो आवयोः ८ व्यवसायं निश्चयं १०

संयोगविधिः जीवब्रह्मैक्यप्रतिपादका वेदांताः स्तोभाः सामगीतिपूरणार्थानि अक्षराणि हाथिहावुइत्यादीनि ९१ अयेति अयोगविधिना परस्परोपकारेण सहितौ एककाल एव विषयाणां रूपादीनां प्रतिसंहारं प्रतीपसंहारं विषयकारणीभूतेंद्रियसंहारेणैव संहारं ९६ तत्र क्रममाह प्राणेति मूलाधारात्कुंडलि

तपांसि संयोगविधिर्वेदाः स्तोभाः सरस्वती नारदः पर्वतश्चैव विश्वावसुर्हहाहुहू ९१ गंधर्वाश्चित्रसेनश्च परिवारगणैर्युतः नागाः सिद्धाश्च मुनयो देवदेवः प्रजापतिः ९२ विष्णुः सहस्रशीर्षश्च देवोऽचिंत्यः समागमत् अवाद्यंतांतरिक्षे च भेर्यस्तूर्याणि वा विभो ९३ पुष्पवर्षाणि दिव्यानि तत्र तेषां महात्मनां ननृतश्चाप्सरःसंघास्तत्र तत्र समंततः ९४ अथ स्वर्गस्तथा रूपी ब्राह्मणं वाक्यमब्रवीत् संसिद्धस्त्वं महाभाग त्वं च सिद्धस्तथा नृप ९५ अथ तौ सहितौ राजन्नन्योन्यविधिना ततः विषयप्रतिसंहारमुभावेव प्रचक्रतुः ९६ प्राणापानौ तथोदानं समानं व्यानमेव च एवं तौ मनसि स्थाप्य दध्रतुः प्राणयोर्मनः ९७ ॥

नीमुत्थाप्य ऊर्ध्वोर्ध्वचक्रजयक्रमेण मनसि हृदये ऽनाहतचक्रे स्थाप्य निरुध्य तत्रस्थं मनः एकीभूतयोः प्राणापानयोः स्थाप्य वशीकृत्य आदध्रतुः धारयतः स्म ९७

उपस्थितंउपस्थंकुरुतः तौउपास्थितहृतौवहृय ... सनाविसर्थीः भ्रुवोरधः नाशिकाग्रंपश्यंतावितिशेषः स्वनासिकाग्रंस्वेनद्रष्टुमशक्यमतोयएवायमाद्रर्शेप
रूषएनमेवाहंब्रह्मोपासेइतिश्रुते राद्दर्शस्यनासिकाग्रदर्शनंमाभ्रसंतीतिभ्रुवोरधइतिविशेषणंतेननासंतंनिमीलिताक्षः स्यात् निद्राप्राप्तेः नापिउद्घा

उपस्थाप्योदरेतौचनासिकाग्रमधोभ्रुवोः भ्रकुट्यांचैवमनसाशनैर्द्धारयततस्तदा १८ निश्चेष्टाभ्यांशरीराभ्यांस्थिरहृष्टीस
माहितौ जितात्मानौतथाधायमूर्द्धमात्मानमेवच १९ तालुदेशमथोद्दाल्यब्रह्मरंध्रस्यमहात्मनः ज्योतिर्न्निर्जलाभ
महतीजगामत्रिदिवंतदा २० हाहाकारस्तथादिक्षुसर्वेषांसमहानभूत तज्ज्योतिः स्तूयमानंस्मब्रह्माणंप्राविशत्तदा
२१ ततः स्वागतमित्याहतत्तेजः प्रपितामहः प्रादेशमात्रंपुरुषंप्रत्युद्गम्यविशांपते २२ भूयश्चैवापरंप्राहवचनंमधुरं
तदा जापकैस्तुल्यफलतायोगानांनात्रसंशयः २३ योगस्यतावदेतेभ्यः प्रत्यक्षंफलदर्शनं जापकानांविशिष्टंतप्र
त्स्थानंसमाहितं २४ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

दिताक्षः स्यात्लोकदर्शनेनविक्षेपादित्युक्तं।उपस्थाप्योदरेतौचेतिपाठेतौप्राणापानौभ्रकुट्यांभ्रुवोर्मध्येमनसाचक्रेधारयतः १८ तथाउक्तप्रकारेणात्मेन
चित्तौतौ आत्मानंचित्तंप्राणांसंहितंमूर्द्धनिधारयतइतिपूर्वेणान्वयः सुषुम्नामार्गेणेतिशेषः १९ तालुदेशंब्रह्मरंध्रं २२ योगानांयोगिनौ २३ योगस्ययोगेन
एतेभ्यः सएतेषांसम्यानांसमाहितंविहितं २४ ॥ ॥

जितात्मानौ २

उत्पतामिति। अत्रचान्तर्मुखास्येप्रवेशीनयाहुः स्वहेतुअष्टिलिंगवियोगोजापकस्यब्रह्मलोकंगतस्यसद्यएवभवतीत्युक्तम् तत्रहेतुरखेनयदिति तस्यब्रह्मान्तर्येकांवो
धितवानित्यर्थः अयमर्थोभगवद्गीतायामसंगृहीतः सर्वद्वाराणिसंयम्यमनोहृदिनिरुध्यच मूर्ध्न्याधायात्मनःप्राणमास्थितोयोगधारणां ओमित्येकाक्षरं

उष्पतांमपिचेतस्त्वाचेतयन्तनंतपनः अथासंप्रविवेशास्यवास्मणोभिगतज्वरः २५ राजाप्येतेनविधिनाभगवंतंपितामहं
यथैवद्विजशार्दूलस्तथैवप्राविशत्तदा २६ स्वयंभुवमथोदेवाअभिवाद्यततोब्रुवन् जापकानांविशिष्टेयमुत्थानंसमाहितं २७
जापकार्थमयंयत्नोपदर्थैवयमागताः कृतपूजाविमौतुल्यौत्वयातुल्यफलाविमौ २८ २९ योगजापकयोर्दृष्टंफलंसुमहदद्यवै
सर्वांल्लोकाननतिक्रम्यगच्छेतांयत्रवांछितं २९ ब्रह्मोवाच महास्मृतिंपठेद्यस्तुतथैवानुस्मृतिंशुभां तावप्येतेनविधिनागच्छ
तांमत्सलोकतां ३० यश्चयोगेभवेद्भक्तः सोपिनास्त्यत्रसंशयः [illegible] विधिनानेनदेहांतेममलोकानवाप्नुयात्
३१ साधयेगम्यतांचैवयथास्थानानिसिद्धये ३२ ॥

व्याहरन्मामनुस्मरन्यः प्रयातिसमद्भावंयातिनास्त्यत्रसंशयइतिस्मरेत्वब्रह्मणासहतेसर्वेसंप्राप्तेप्रतिसंचरे। परस्यांतेकृतात्मानःप्रविशंतिपरंपदमितिस्मृतेः कर्मा
तेअष्टिलिंगान्मुच्यंतेइतिभेदः २७ वर्यंत्रिदशश्रेष्ठास्यः त्वयाचतन्मुखेन २८ वांछितेत्रागतंमत्वं २९ संहिताध्यायिनांफलमुक्त्वाषडंगाध्यायिनांमन्वादिस्मृत
ध्यायिनांचफलमाहमहास्मृतिमिति ३१ साधयेयुष्मदिष्टमितिशेषः ३२ ॥ ॥ ॥ ॥ ॥

३५ जापकोपाख्याने समाप्तं षट्त्रिंशोध्यायः ॥ ॥ पूर्वं च जापकत्वसंगाद्योगस्यापि श्रेयस्त्वमुक्तं योगजापकयोर्हि एकं फलं समहत्वं च इति तथा उष्मंतां मपि वेत्स्यत्का॰ चेतयन्स ननं तं पुनरिति जपफलकाले ब्रह्मबोधस्यापि द्वारत्वमुक्तमेवं योगोपि ज्ञानसहाय एव ज्ञानफलकृदिति मत्वा पृच्छति किमिति ज्ञानं विचारस्तत्सहितो योगः

भीष्म उवाच इत्युक्त्वा सततं देवास्ते चैवांतरधीयत आश्रमं च ततो देवाः प्रययुः स्वं स्वं निवेशनं ३३ ते च सर्वे महात्मानो धर्मं सत्कृत्य तत्र वै पृष्ठतोनुययू राजन्सर्वे सुप्रीतचेतसः ३४ एतत्फलं जापकानां गतिश्चैव प्रकीर्तिता यथा श्रुतं महाराज किं भूयः श्रोतुमिच्छसि ३५ शांतौ मोक्षधर्मेषु जापकोपाख्यानं ॥ ॥ युधिष्ठिर उवाच किं फलं ज्ञानयोगस्य वेदानां नियमस्य च भूतात्मा च कथं ज्ञेयस्तन्मे ब्रूहि पितामह १ भीष्म उवाच अत्राप्युदाहरंतीममितिहासं पुरातनं मनोः प्रजापतेर्वादं महर्षेश्च बृहस्पतेः २ प्रजापतिं श्रेष्ठतमं प्रजानां देवर्षिसंघप्रवरो महर्षिः बृहस्पतिः प्रश्नमिमं पुराणं पप्रच्छ शिष्योथ गुरुं प्रणम्य ३ यत्कारणं यत्र विधिः प्रवृत्तो ज्ञाने फलं यत्प्रवदंति विप्राः यन्मंत्रशब्दैरकृतप्रकाशं तदुच्यतां मे भगवन्यथावत् ४ ॥ ॥

ज्ञानयोगस्तत्स विद्यामेतां योगविधिं च कृत्स्नं तत्कारणं सांख्ययोगाभिपन्नमित्यादिलिंगादनयोः समुच्चयावगमात् वेदानां च किं फलं तथा नियमस्याग्निहोत्रादेः भूतात्मा जीवः ३ कारणं जगत इति शेषः यत्र यन्निमित्तं विधिः कर्मकांडः ज्ञाने सति यत्फलं प्राप्यं मंत्रशब्दैः वेदवाक्यैः वाङ्मनसातीतत्वात् अप्रकाशितं ४ ॥

अर्थशास्त्रं त्रिवर्गशास्त्रं। आगमो वेदः मंत्राः इष्टत्वादयो वेदांतर्गताः तद्विद्भिर्नरैः यत्नयज्ञादिभिः फलं स्वर्गादि यदुपास्यते तेनोक्तं किं वा तत्कथं केन प्रकारेण वा तत्प्राप्तिर्भविता क
वा तत्स्वर्गं देशांतरे वा प्रसंगात्मने वा ५ महीजाः स्थावरजंगमाः ६ ज्ञानं यतः यस्मिन्विषये ततः ज्ञानात्तदर्थी ज्ञानार्थी मिथ्याप्रवृत्तिं न तज्ज्ञाता प्रवृत्तिं

पश्चार्थशास्त्रागममंत्रविद्भिर्यत्नैरनेकैरथयोगप्रारम्भैः फलं महद्भिर्यदुपास्यते च किं तत्कथं वा भविता क्व वा तत् ५ महीमहीजाः
पवनांतरिक्षं जलौकसश्चैव जले दिवं च दिवौकसश्चापि यतः प्रसूतास्तदुच्यतां मे भगवन्पुराणं ६ ज्ञानं यतः प्रार्थयते नरो वै
ततस्तदर्थाभवति प्रवृत्तिः न चाप्यहं वेद परं पुराणं मिथ्याप्रवृत्तिं च कथं न कुर्यां ७ ऋक्सामसंघांश्च यजूंषि चापि छंदांसि न
क्षत्रगतिं निरुक्तं अधीतवान् व्याकरणं सकल्पं शिक्षां च भूतप्रकृतिं न वेद्मि ८ स मे भवानशंसर्वमेतत्सामान्यशब्दैश्च विशेष
णैश्च स मे भवानशंसतु तावदेतत् ज्ञाने फले कर्मणि वा यदस्ति यथा च देहाश्रवते शरीरी पुनः शरीरं च यथाभ्युपैति ९ म
नुरुवाच यद्यश्चियं यस्य स्वरूपं तत्परात्परस्तदेव दुःखप्रवदंत्यनिष्टं इष्टं च मे सादितरा च्चनस्सा रेतत्क्रते कर्मविधिः प्रवृत्तः १०

स्वास्थ्यैकयत्नं कुर्यां ७ सोऽहं भगवो मंत्रविदेवास्मि नात्मविदिति श्रुतेः अस्तातामादिज्ञानेऽपि भूतप्रकृतिविषयात्मपादानमात्मानं न वेद्मि ८ सामान्यशब्दैः आत्मेति
वोपलब्धव्य इत्यादिभिः विशेषणैः सत्यं ज्ञानमनंतं विज्ञानमानंदं विज्ञानमानंदं ब्रह्म इत्यादिभिः ९ यत्र विधिः प्रवृत्तस्तत्सोऽत्र माहयतीति १० ॥ ॥

त्तानेफलंपदिसस्योत्तरमाहइष्टमिति ११ यथार्थीशास्त्रेमस्योत्तरमाह कामेति कामात्मकाः कामप्रधानाः छंदसिवेदेएभिः कामैः कर्मयथावेदोक्तंलौकि
केवानिरयंस्वर्गं।नरकंवा १२ एतत्साक्षिपस्तदेनइष्टमिति इष्टानिष्टेप्रियाप्रियेसलदुःखेतनतः सुखमिष्टंयास्त्वंदुःखमनिष्टंत्याज्यंमाच्छाशीः प्रार्थना मा
चकर्मभिः एनंप्रार्थयितारंत्वंवच्छंदति व्याप्नोति एतावदेवपुरुषः प्रार्थयतेनान्यत्कर्मफलमत्तोऽर्थीः स्वर्गकामोयजेतश्येनाभिचरन्यजेतेत्यादेस्तन्निशि

न्य१ ने१

वि

इष्टंत्वनिष्टंचनमांभजंतेनेत्येतत्कृतेज्ञानविधिः प्रवृत्तः कामात्मकाञ्छंदसिकर्मयोगाएभिर्विमुक्तः परमश्नुवीत
नानाविधेकर्मपथेसुखार्थीनरः प्रवृत्तोनिरयंप्रयाति १२ बृहस्पतिरुवाच इष्टंत्वनिष्टंचसुखासुखेचसाशी
स्त्वंवच्छंदतिकर्मभिश्च १२ मनुरुवाच एभिर्विमुक्तः परमाविवेशएतत्कृतेकर्मविधिः प्रवृत्तः कामात्मका
नछंदतिकर्मयोगाएभिर्विमुक्तः परमाददीत १३

इस्यतस्यैवफलत्वेनश्रवणात् १२ विविदिषंतियज्ञेनेत्यादिवाक्यात् एभिः कामैर्विमुक्तस्तत्कर्मणापनष्टायपरंब्रह्मविविदिषोमस्मादिह्याएवविशेत् ए
तदर्थमेवकर्मविधिः प्रवृत्तः स्वर्गादिफलश्रवणंतुकामात्मिकानेवच्छंदतिग्राहयतीति।अतः एभिः कामैर्विमुक्तः परमेवाददीतब्रह्मज्ञानार्थमेवकर्मणापन
निष्ठेत्नकृतुच्छफलार्थमित्यर्थः १३ ॥

किंरूपेणादीन्यपि ज्ञानार्थमनुष्ठेयानि नेत्याह । आत्मेति । आत्मादिनं आदिभिः प्रथमैर्नियमैरित्यर्थः इध्यमानः रागादिदोषापनयेनादर्शवद्दीप्यमानः द्युति
मान् तद्सद्विषयप्रकाशवान् अन्नरस इव सरसः स्वार्थी मुमुक्षुः परं स्वतन्त्रं कर्मणो गौरवं निराशिषमिममनेन साशीस्त्वबुद्धेरिति परोक्तिर्निरस्ता अत्रैवेति उपैति स्वयं ना
प्राप्नोति २४ ननु बन्धकानां कर्मणां कथं बन्धनिवर्तकत्वं न हि रुधिरया आचान्तः शुध्यतीत्याशंक्याह प्रजाः सृष्ट्वा इति एतौ मनःकर्मणी संस्कारद्वारेणापि सत्प

आत्मादिभिः कर्मभिरिध्यमानो धर्मे प्रवृत्तो द्युतिमान्स्वार्थी । परं हि तत्कर्मपथादपेतं निराशिषं ब्रह्मपरं त्वुपैति २४
प्रजाः सृष्ट्वा मनसा कर्मणा च द्वावेवैतौ सत्पथौ लोकजुष्टौ । दृष्ट्वा कर्म शाश्वतं चान्तवच्च मनस्त्यागः कारणं नान्यदस्ति २५
स्वेनात्मना चक्षुरिव प्रणेता निशात्ययेन तमसा संवृतात्मा । ज्ञानं तु विज्ञानगुणेन युक्तं कर्माशुभं पश्यति वर्जनीयं २६

थौ ब्रह्मप्राप्तिमार्गौ कथं तयोराह दृष्ट्वेति दृष्ट्वा प्रसंस्कृतिबोधितमित्यर्थः शाश्वतं च मोक्षहेतुरपि अन्तवच्च इह फलमपि । तत्र मनसा क्रियमाणस्त्यागः फल
गर त्यागः एव शाश्वते लेकर्मणां कारणं नान्यत् तत्स्वरूपेणात्यागस्त्वर्थः २५ स्वेनेति यथा चक्षुः प्रणेता नायकः निशात्यये रात्र्यन्ते तमसा संवृतात्मा अनावृतस्व
रूपः सन् स्वेनात्मना तेजसेन वा ऽलोकेन वर्जनीयं कंटकादिकं पश्यति एवं ज्ञानं बुद्धिः विज्ञानगुणेन विवेकेन युक्तं सत् अशुभं पश्यति २६ ॥

दृष्टांतं विहाय अज्ञानफलस्य श्रैष्ठ्यमाह सर्पानिति उदपानं कूपं १७ ज्ञानपूर्वकं कृतं कर्म सफलमित्याह कृत्स्न इति कर्म पंचात्मकं पंचप्रकारं यथा आरण्ये अग्नौ ध्यानं निष्पादकाः पस तथा समाधिः एकाग्रं देवता ध्यानादौ पस्यैदेवतापैष्टे विशिष्टे तं स्मातं ध्यायेदिति श्रुते । फलं च फलवत् १८ कर्तव्यानां भेदात्कर्मणां फलभेदमाह गुणेति गुणात्मकं सात्विकं राजसं च विधेयं कर्मेत्यर्थः तस्मादेतो मंत्रोपि गुणात्मकः तत्र हेतुं मंत्रपूर्वं हि कर्म तत्र सात्विको मंत्रः अग्निमीळेपुरोहितमिति

सर्पान्कुशाग्राणि तथोदपानं ज्ञात्वा मनुष्याः परिवर्जयंति अज्ञानतस्तत्र पतंति केचित् ज्ञाने फलं पश्य यथा विशिष्टं १७ कृत्स्नस्तु मंत्रो विधिवत्प्रयुक्तो यज्ञा यथोक्तास्त्वथ दक्षिणाश्च अन्नप्रदानं मनसः समाधिः पंचात्मकं कर्मफलं वदंति १८ गुणात्मकं कर्म वदंति वेदास्तस्मान्मंत्रो मंत्रपूर्वं हि कर्म विधिर्विधेयं मनसोपपत्तिः फलस्य भोक्ता तु तथा शरीरी १९

इषे त्वोर्जे त्वा तामसः सर्वं प्रविध्यत् हृदयं प्रविध्येत्यादिः एवं विधिरपि त्रिविधः आत्मकामो यजेत अभिचरन्यजेतेत्यादिः कर्तव्यमावश्यमेव यदपि तद्दृष्टमाह मनसोपपत्तिः फलस्येति तथा हि यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति विद्यादिमान् सात्विकः कर्ता विद्यादिहीनः केवलं प्रवृत्तिमात्रपरो राजसः दंभाभिसंधिस्तामसः तेषां कर्मक्रमेण वीर्यवत्तरं वीर्यवत् निर्वीर्यं च भवति यथा फलस्योपपत्तिस्तथा फलस्य भोक्तापि सर्वो दुःखी सुखी वा भवति १९

मो०
८५

४५

शब्दादयः कर्मफलं कर्मप्राप्ये लोके स्वर्गे सिध्यन्ति। नरः प्रभुरधिकारी ज्ञानफले इति शेषः। नसंस्थानगत इत्येकं पदं मरणं प्राप्तोऽपि जीवन्नेव स्यात् उद्धृतत्वात् मुक्त
भोक्तृत्वमित्यदृष्टफलात्कर्मणोऽपेक्षया दृष्टफलं ज्ञानमेव श्रेय इति भावः २० ननु कर्मभ्य एव मोक्षः सिध्येत् किं ज्ञानेनेत्यत आह यद्यदिति शरीरवता कृतं क

शब्दाश्च रूपाणि रसाश्च पुण्याः स्पर्शाश्च गंधाश्च शुभास्तथैव नरो न संस्थानगतः प्रभुः स्यादेतत्फलं सिध्यति कर्मलो
के २० यद्यच्छरीरेण करोति कर्म शरीरयुक्तः समुपाश्नुते तत् शरीरमेवायतनं सुखस्य दुःखस्य चाप्यायतनं शरीरं २१
वाचा तु यत्कर्म करोति किंचिद्वाचैव सर्वं समुपाश्नुते तत् मनस्तु यत्कर्म करोति किंचिन्मनस्थ एवाश्नुते तत् २२ य पनुपा २
यथा यथा कर्मगुणं फलार्थी करोत्ययं कर्मफले निविष्टः तथा तथायं गुणसंप्रयुक्तः शुभाशुभं कर्मफलं भुनक्ति २३

र्म शरीरयुक्तेनैव भोक्तव्यं यतः कर्मफलस्य दुःखादेरायतनमाश्रयः शरीरं न शरीरस्य आत्मनो शरीरत्वलक्षणो मोक्षः न शारीरेण कर्मणा सिध्यतीत्यर्थः २१ तर्हि
वाचिकेन जपादिना मानसिकेन ध्यानादिना मोक्षः सिध्यतीत्यत आह वाचेति। वाङ्मनसाभ्यां कृतं कर्म न हि नैव मोक्षाय न नत तदतीतं वाङ्मनोगोचरत्वादित्यर्थः २२ कर्मणि गु
णाः सत्त्वरजस्तमो वा कर्मगुणास्तं २३ ॥ ॥ ॥ ॥ ॥

एम०
८५

अयथा प्रतिकूलं स्रोतः प्रवाहं जलवेगेनाभिपाती भवति न त्विच्छया तथा कर्मप्रवाहो ऽभ्युपेति अनुवर्तते तत्रैवं सति शुभेनाशोभनत्वं शुभे इति मोक्षमेवे
त्यर्थः २४ एवं कर्मगतिमुक्त्वा ज्ञानेन वक्ष्यामीति प्रतिजानीते यत इति आत्मवंतो जितचित्ता जगत् अतिक्रम्य यत् पदं यांति परं श्रेष्ठं यत् २५ यतस्मा
द्दीनमपि तान् पंचप्रकारान् रसादीन् जनानां मोक्षणामर्थे समर्थे उत्पादि वर्ण अवर्णी लोहितशुक्लकृष्णवर्णी लोहितशुक्लकृष्णवर्णी प्रधानं रजःस

मत्स्यो यथा स्रोत इवाभिपाती तथा कृतं पूर्वमुपैति कर्म शुभे त्वसौ तुष्यति दुष्कृते तु न तुष्यते वै परमः शरीरी २४ यतो जगत्सर्वमिदं प्रसूतं ज्ञात्वात्मवंतो व्यतियांति यत्तत् यन्मंत्रशब्दैरकृतप्रकाशं तदुच्यमानं शृणु मे परं यत् २५ रसैर्विमुक्तं विविधैश्च गंधैरशब्दमस्पर्शमरूपवच्च अग्राह्यमव्यक्तमवर्णमेकं पंचप्रकारं ससृजे प्रजानां २६ न स्त्री पुमान्वापि नपुंसकं च न सन्न चासत्सदसच्च तन्न पश्यंति यद्ब्रह्मविदो मनुष्यास्तदक्षरं न क्षरतीति विद्धि २७ शांतौ मोक्षधर्मे पुबृहस्पतिसंवादे ॥ ॥ ॥

त्वतमोमयं तदसृजत् २६ सत्प्रधानपरमाण्वादि असत् तुच्छं सदसत् अनिर्वचनीयं मायाशबलं अत एवाक्षरं अपरिणामिना सदासीन्नो सदासीत्तदा
नीं नासीद्रजो नो व्योमा परो यदिति श्रुतावपि सृष्टेः प्राक् सदसद्रजः शब्दैः इतानां प्रधानासत्परमाणूनां प्रकृतिप्रसक्तानां परव्योमशब्दीतस्य मायाशबलस्य च त
त्कारणात्वं इति प्रसक्तस्य निषेधात् २७

86

अकृतात्मायामहामायातः ननु नैवं मायापरोपदिति स्पष्टः प्राकृमायाशबलस्य निषेधात् कथं अकृतेर्मायामहामायादिति विशेषणं दीयते सत्यं तत्तेनाभ्यपिहितं यद्वासौ दितिनैवमाकाशेषेत्यत्वेन मिथ्यात्मतेन तत्र मायाच्छा मुख्यापकं अपिहितं आच्छादितमित्यर्थः तमसशब्देन तत्त्वाभिधानात् न मर्येणारब्धाद्वयनपरमार्थ्यतोऽकृतेरसमद्वितीयत्वमितिदेयं एवं वन्द्यात्तानामद्गानाच्छुक्तिरं शाद्ग नैतमिवाकृतात्स्वायुम्यघतेऽग्निनक्वचिद्दोषः १ एवमकृतेर्जगदारोप्यन्नपवदति एतैरिति पार्थिवैः शरीरैर्लव

मनुरुवाच अकृतात्त्वं ततो वायुस्ततोऽग्निस्ततो जलं जलात्सृष्टा जगती जगत्संजायते जगत् १
एतैः शरीरैर्जलमेव गत्या जलाच्च तेजः पवनोऽन्तरिक्षं खाद्वै निवर्त्तन्ति न भाविनस्ते मोक्षं चैव परमाप्नुवन्ति २

रोहकमायेन शरीरेण जलं गत्वेति सृष्टिविपरीतक्रमेण संहारक्रमः तेजसः पवनं ततोऽन्तरिक्षं गत्वेति योज्यं अन्तरिक्षमाकाशं खात्तस्मादपि पञ्चमी मायाशबलं खशब्दोदितमतोऽपि भाविनः भावोऽहङ्कारं तेषामात्मत्वेनाहिंतां निर्विशेषं ब्रह्म गत्वा नैव संसारे न निवर्त्तन्ति न संसरन्ति किं तेन परं मोक्षं प्राप्नुवन्ति ये भाविनस्ते परमाप्नुवन्ती ति पाठे तु येन भाविनस्ते खात्तं प्राप्य निवर्त्तन्ति ये तु भाविनस्ते खादपि परं यान्तः प्राप्नुवन्तीति योजना २

एवं ज्ञातस्यापि परस्य योगैकगम्यत्वं वक्तुं लक्षणमाह नोष्णमिति न शीतं न मृदु इति नोष्णं न कषायं न मधुरमिति च संबंधः स्वभावः प्रमातृत्वादिस्तद्दर्शी ३ कस्तर्हि
सादीनां वेदितेत्यत आह स्पर्शमिति। तनुः त्वगिंद्रियं। त्वगादिभिस्तत्परं वस्तु न च गृह्यत इति यतः अनध्यात्मविदः आत्मानमधिकृत्य प्रवृत्तो योगः अध्यात्मं
तदनभिज्ञाः योगमेवाह। निवर्त्तयित्वेति गुरुकृत्युक्तेति शेषः नहि पुरुषकारेण शब्दात् श्रोत्रं निवर्त्तयितुं शक्यं यथोक्तं वार्त्तिके शांतो दांत उपरतस्तितिक्षुः

नोष्णं न शीतं मृदु नापि तीक्ष्णं नाम्लं कषायं मधुरं न तिक्तं न शब्दवन्नापि च गंधवत्तन्न रूपवत्तत्परमस्वभावं ३ स्पर्शं तनु
र्वेद रसं च जिह्वा घ्राणं च गंधाञ्छ्रवणौ च शब्दान् रूपाणि चक्षुर्न च तत्परं यद्गृह्णंत्यनध्यात्मविदो मनुष्याः ४ निवर्त्तयि
त्वा रसनां रसेभ्यो घ्राणं च गंधाच्छ्रवणौ च शब्दात् स्पर्शात्त्वचं रूपगुणात्तु चक्षुस्ततः परं पश्यति स्वं स्वभावं ५ ॥ ॥

समाहितो भूत्वात्मन्येवात्मानं पश्येदिति श्रुतेर्व्याख्याने स्वातंत्र्यं येषु कर्त्तुः स्यात्कारणाकरणं प्रति तानेव तन्निषिद्धानि कर्माणीह शमादिभिः अस्वातंत्र्यं तेषु स्या
त्कर्त्तुः कर्मस्य सर्वदा समाहितो नयाथेदानीं तन्निरोधो विधीयते पीडीकृतेंद्रिययामं बुद्ध्वा वारोप्य निश्चलं विषयांस्तत्र नीत्वा तिष्ठेच्चिरं तु रोधतः एषोभ्युपायः
सर्वत्र वेदांतेषु प्रतिष्ठितः तत्त्वमस्यादिवाक्योत्थज्ञानोत्पत्त्यर्थमादरादिति ततो निवर्त्तकात्प्रमातुः परं तदुपाधिभूतबुद्ध्यादेः परं स्वं प्रत्यगभिन्नं स्वभावं स्वरूपं मत्तां
पश्यति ५५

87

कोमोक्षस्वभावस्तत्तत्राह। यतइति। तेमुनयः समुदायंकर्त्रादितंघातंयत्कारणंयहेतुकंत्राहुःतंतत्स्वभावंयश्यतीतिर्हेगान्वयः समुदायमाहयः कर्ताप्रमातायेनज्ञानं
मेकरणेनयतप्राप्यमुद्दिश्ययस्मिन्देशेकालेचयस्मिन्समवेतुः सेवानिमित्तमतेतांतदनुकूलांप्रवृत्तिंयत्नंत्रारभतेयत्रारभ्यतत्कर्मदर्शनगमनादिकंकरोतियतः एग
हेषादितःत्रहष्टातईश्वरेच्छातोवागहीत्वात्रवलंब्येतियोजनातनस्वकर्त्राकर्मकरणंदेशकालौसमवतुःसेवप्रवृत्त्यारंभारभ्योयत्नोगमादिकंरागाद्वेष्टृष्ण्यादिकंचसमुदा
यत्तस्ययतहेतः चिन्मात्रंतहेवस्वभावइत्यर्थः ६ ननुकिंतत्कारणंयदपेक्षानित्ययोरपिजीवेशयोःकार्यत्वमुच्यतेइत्याशंक्याहयदेतिवाशब्दएवार्थे।यदेवग्राह्यकर्ह

यतोगृहीत्वाहींकरोतियच्चयस्मिंश्चतामारभतेप्रवृत्तिं यस्मिंश्चप्रयोगेनचयश्चकर्त्रायत्कारणंतेसमुदायमाहुः ६ यद्ग्राह्यमग्राह्यकसा
धकंचयन्मंत्रवचतस्यास्तिचापिलोके यः सर्वहेतुः परमात्मकारीतत्कारणंकार्यमतोयदन्यत ७ ॥ ॥ ॥

स्वरूपंसाधकंग्राह्यंजीवाख्यंचाम्रत उभयोर्विभुत्वेनित्यत्वेचतत्स्वत्वेननियम्यनियामकभावोनस्यात्तथाचश्रुतंतःप्रविष्टःशास्ताजनानांसर्वात्मेसा दृयःश्रुतयो
नोपपद्येरन् एकस्यैवोभयात्मकत्वेमानमाहमंत्रविदिति।एकएवतुभूतात्माभूतेभूतेव्यवस्थितः एकधाबहुधाचैवदृश्यतेजलचंद्रवदितिमंत्रएवात्रप्रमाणमित्य
र्थः भूतात्मानित्यात्मारकत्वेतिव्यापकत्वेन।स्यात्सनीतिस्यात्एवंकूटस्थत्वापरपर्यायमुच्यते यःआत्मकारीआत्मनैवएकाकीद्वितीयेनकरोतिसर्वमित्यात्मकारीतदा
त्मानंस्वयमकुरुतेत्यादिश्रुतेः नतपरंकारणंत्रानंदाद्धेवखल्विमानिभूतानिजायंतइत्यादिश्रुतेःत्रानंदमयाख्यईश्वरस्तत्वांतःकारणं।श्रुत्यपेक्षयाकार्यमित्यर्थःतदिदमनंतं
कार्यमतोयदन्यदिति ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥

एवं स्वभावस्य परमकारणत्वमुक्त्वा ज्ञानात्मतामप्याह त्रिभिः यथा हीति स्वकृतैः सम्यगनुष्ठितैः पुण्यपापैः शुभाशुभेषु शरीरेषूत्पन्नेषु इदं सञ्जातं स्वभावाख्यं परमकारणं ज्ञानं नित्यं तत्स्वभावं निबद्धं शुभाशुभवक्रत्वजनेऽपि सह भवतोः विरोधादित्यर्थः ८ यथेति यथा हृत्कायस्थो दीपः भूयांसं विषयमवभासयति तथायं हृत्कमलस्थः एवं पंचेन्द्रियरूपाः चैतन्यप्रदीपयुक्ता हृत्काइवाः प्रकाशाः ज्ञानदीपेन प्रदीप्ताः परं ततः चित्प्रकाशाधीनतया प्रकाशकत्वात् न स्वतः इत्यर्थः तथा चक्षुतपः येन वागम्यते ये

यथा हि कश्चित्स्वकृतैर्मनुष्यैः शुभाशुभं चाप्यनुनेथा विरोधात् एवं शरीरेषु शुभाशुभेषु स्वकर्मजेष्वज्ञानमिदं निबद्धं ८ यथा प्रदीप्तः पुरतः प्रदीपः प्रकाशमन्यस्य करोति दीप्यन् तथेह पंचेन्द्रियदीपवृक्षा ज्ञानप्रदीप्ताः परवंत एव ९ यथा च राज्ञा बहवो ह्यमात्याः पृथक्प्रमाणं प्रवदंति युक्ताः तद्वच्छरीरेषु भवंति पंच ज्ञानैकदेशाः परमः स तेभ्यः १० यथार्चिषोऽग्नेः पवनस्य वेगा मरीचयोऽर्कस्य नदीषु चापः गच्छंति चायांति च संचरंति तद्वच्छरीराणि शरीरिणां तु ११ यथा च कश्चित्परशुं गृहीत्वा धूमं न पश्येज्ज्वलनं च काष्ठे तद्वच्छरीरोदरपाणिपादं छित्त्वा न पश्यंति ततो यदन्यत् १२

न च कंचिदपि पश्यति येनाकर्मणो मतः इत्याशयः ९ तेभ्य इंद्रियेभ्यः सः ज्ञानरूपः स्वभावः परमः १० अस्य ज्ञानस्य नित्यत्वं साधयति यथार्चिष इति शरीरेषु मनो द्वारा ज्ञानं निबद्धमपि शरीराण्येव नश्यंति न ज्ञानमित्यर्थः ११ उपायं बुद्ध्यैव बोद्धव्यं ज्ञानयोरहस्यत्वं सदृष्टांतमाह द्वाभ्यां यथा चेति गृहीत्वा व्यापारयित्वा १२ १२ १२ ॥

योगात्तउपायात्। पश्यामीसतमभवन्निंद्रियात्माजीवः सबुद्धिः परं बुद्धिं च समं एककालं पश्यतीत्यर्थः १३ देहनाशोमृत्यादिनाबुद्ध्युपाधिश्छिदात्मा नबाध्यते इत्याह दृष्टा
मां। यथात्मन इति। अंगशरीरमनंतस्यात्मनः पृथक्कृत्वअंतरेत्वप्नमध्येयथापश्यति सुमहान्सबुद्धिः मनोबुद्धियुक्तः श्रोत्रादिभिर्दशभिरिंद्रियैः पंचभिः प्राणैश्चसहितः
सप्तदशात्मकोगो आत्मनः शरीरं पृथक्कृत्वस्मात्पश्यन्नापिनचात्मनो भिन्नत्वमज्ञानेनशरीरंतादात्म्यको भवति लिंगात्स्थूलदेहातलिंगंतदेवदेहांतरं १४ सन्निपातोमारणां

तामेवकाष्ठानियथाविमथ्यधूमंचपश्येत ज्वलनंचयोगात् तद्वत्सबुद्धिः सममिंद्रियात्मा बुधः परं पश्यतितंस्वभावं १३
यथात्मनोगंपतितंपृथिव्यांस्वप्नांतरे पश्यति चात्मनोन्यत् श्रोत्रादियुक्तः समहान्सबुद्धिर्लिंगात्तथा गच्छति लिंगमन्यत् १४
उत्पत्तिवृद्धिव्ययसंनिपातैर्नयुज्यतेसोपरतः शरीरी अनेनलिंगेनतुलिंगमन्यद्गच्छत्यदृष्टः फलसंनियोगात् १५ नचक्षु
षापश्यतिरूपमात्मनोनचापिसंस्पर्शमुपैतिकिंचित् नचापितैः साधयतेतुकार्यं तेतंनपश्यंतिसपश्यतेतान् १६ ॥

सावद्धः स्वस्वदृष्टकर्मसंबंधात्। अनेनलिंगेनशरीभूतेनअदृष्टः अलक्षितः १५ एवमात्मनोबुद्धितादात्म्यमुक्त्वातत्संसारमुक्त्वा वस्तुतोऽसंगत्वमाह नचक्षुषेति इंद्रियाण्या
त्मत्वमुक्त्वा नस्पर्शमुपैतीत्यभोक्तृत्वद्वारासंगत्वमुक्तं नचापीत्यकर्तृत्वद्वारा तेचक्षुरादयः सपश्यतेतानिति साक्षित्वमुक्तं साक्षिणोपि बुद्धिवृत्तिव्याप्यत्वात्कर्मत्वमित्याशंक्याह तेतंन
द्वारातन्नपश्यंतीत्युक्तं १६ १६ ॥ ॥ ॥ ॥ ॥ ॥

अयसंगस्यापितस्याय: पिंडवत्वधीनाहात्म्यंग्नां स्यासंस्याश्वनीतितिरिस्याहृयद्योतिरूपंपैंगल्यादिकंक । श्वेतस्यय: पिंडादि: तथापिस: वल्करूप्यादग्धलपिंगलत्वात्स्यंग्न परंगुणं रूपंवायथानविभर्तितथैवतत्स्यस्यात्मन: रूपंचैतन्यंदेहेहृश्यतेनतद्देहोवत्स्कतस्वेतन: तथापिसोहंपौंचत्कोणत्वादिकंवद्धाविवात्मनिदेहगतंदु:खा दिकंपतीयतइत्यर्थ: १७ कद्दृष्टांतेनैववधघस्थशरीरंस्यात्मा प्राप्नोतितत्स्यतत्सधर्मानात्मन्यभिमन्यंतरत्याहतथेति अदृश्यंतदस्थै: तदाश्रयंदेहांतराश्रयं १८ अत्र

यथासर्पिपिंडलतो: नलसंतापनंरूपमुपैतिकश्चित् नचापरंरूपगुणंविभर्तितथैवतद्रूपगुणंसमस्तं १७

तथामनुष्य: परिमुच्यकायमदृश्यमन्यद्विशतेशरीरं विसृज्यभूतेषुमहत्सुदेहंतदाश्रयंचैवविभर्तिरूपं १८

खंवायुमग्निंसलिलंतथोर्वींसमंततोभ्याविशतेशरीरी नाना:श्रया: कर्मसुवर्तमाना: श्रोत्रादय:पंचगुणानश्रयंते १९

वसंगात्पूर्वदेहत्यागदेहांतरोपादानंयमप्रकारमाहखमितित्रिभि: शरीरीत्रियमाणा: खाधुपादानकैर्देहांशै: खादीनत्राविशते एवंश्रोत्रादयोपिसमस्तदशनानाश्रया: खादी पादानक्रा: संतोपिकर्मसुपूर्ववज्ञाततहितेषुवर्तमाना: श्लिष्टा: पंचगुणानशब्दादीनश्रयंते अयमर्थ: स्थूलदेहनाशेपिकर्मणावद्दसप्तदशात्मकंलिंगंननश्यतिकिंतदे हांतरंप्रविशतितगाउतो कामापेनतथावक्र्कति: नमुत्क्रामंतंप्राणोनूत्क्रामतिप्राणमनूत्क्रामंतीतितेविद्याकर्मणीसमन्वारभेतेपूर्वप्रज्ञाचेतितथयात्राजलायुका: समाक्रम्यपूर्वं ९ जहातीइति ॥ १९ ॥

क्रामं तं सर्वंप्राणा: ॥१

तत्र किमिंद्रियं कस्य भूतस्य गुणं प्रपद्यत इति व्यवस्थामाह। श्रोत्रं खजः खस्य गुणं शब्दं प्रपद्यते इममनुषंगः पृथिव्याः गुणं गंधं घ्राणं संप्रपद्यते। विपाकः चक्षुस्तत्तेजः परिणामः तेजोमयं रूपं जलात् प्रपद्यते तेजः रसप्रकाशको रसनेंद्रियं रसं प्रपद्यते वाय्वात्मकः स्पर्शकृत इंद्रियविशेषस्त्वक् तमेव वाय्वात्मकं गुणं स्पर्शं प्रपद्यते शब्दादिरसनासहिताः पश्चात्रादयः कर्मसन्निधिश्रमवंतीत्यर्थः २० पंचानामिंद्रियाणामर्थाः शब्दादयः भूतेषु खादिषु वसंति तानि च पंच न खादीनींद्रियेषु वसंति [illegible] सर्वाणि चैतानि शब्दा-

श्रोत्रं खतो घ्राणमथो पृथिव्यास्तेजोमयं रूपमथो विपाकः जलाश्रयं तेज उक्तं रसस्तु वाय्वात्मकः स्पर्शकृतो गुणश्च
२० महत्सु भूतेषु वसंति पंच पंचेंद्रियार्थास्तु तथेंद्रियेषु सर्वाणि चैतानि मनोनुगानि बुद्धिं मनोन्वेति मनः स्वभावं
२१ शुभाशुभं कर्मकृतं परस्मात्तदेव प्रत्याददते स्वदेहे मनोनुवर्त्तंति परावराणि जलौकसः स्रोत इवानुकूलं २२

दीनि खादीनि इंद्रियाणि च मनोनुगानि मनः बुद्धिमन्वेति बुद्धिः स्वभावमन्वेति तेन इंद्रियाणि पराण्याहुरिंद्रियेभ्यः परं मनः मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु स इति गीतासु गता ततश्चार्थानां कारणानामिंद्रियाणि तेषां मनस्तस्य बुद्धिस्तस्या आत्मेति क्रमात् सर्ववासनावासितात्मा बुद्धौ सर्वं मत्तेति तद्वियोगाच्चिदात्मा पुनः पुनः संसरतीत्यर्थः एतदेवाह शुभेति स्वदेहे त्वकर्मार्जितं तत्स्वदेहे इंद्रियादीनि तदेव कर्मस्वात्मत्वेन पतत्यैहिकानत्रमतः पूर्वं जन्म[illegible] कृतं परावराणि सूर्यादीनि पूर्वसंस्कारानुगुणानि देहे कर्माणि कुर्वन्न मुच्यत इत्यर्थः २२ २२ ॥ ॥ ॥ ॥

नचैवमपरिहार्यत्वाद्दुःखमनासंततेः अलं मोक्षाज्ञापेन्याशंक्य अनादिकालागतमपि भ्रमं तत्त्वधीस्समूलमुन्मूलयितुं क्षमते इति प्रतिपादयितुं सदृष्टांतं संसारस्य भ्रमपूर्वकत्वमाह
चलमिति यथा दृष्टिपथं दृष्टिज्ञानं अनतिक्रांतं समस्तमपि तं वस्तु तत्पंथा इव पंथाः हानोपादानादिमार्गो यस्य तत्तथा दृष्टिपथं भ्रांतिज्ञानं तत्रैव चलं वाधविषयतया अ
स्थिरं जनः परैति पराकृत्य एति अवगच्छति प्राप्नोति तत्त्वं यथा नौस्थः नौचांचल्यं नीरतीरारोपयति नौस्थैर्ये च तद्वाधितं भवति एवं परापरमात्मानं कूटस्थमपि बुद्ध्युपधानात् कू
टस्थमिव भासमानं बुद्धिमार्गं भ्रांतिजनककलत्रादिनिरोधेन पराकृत्य परमतत्त्वमभ्येति एवं यथा मत्स्यं अल्पकाष्ठं महद्रूपमिव महत्तरस्य मिव लोचनो जनवलेनाभिनोभा

चलं यथा दृष्टिपथं परैति सूक्ष्मं महद्रूपमिवाभिभाति स्वरूपमालोचयते च रूपं
परं तथा बुद्धिपथं परैति २२ शांतो मोक्षधर्मेषु मनुबृहस्पतिसंवादे॥ ॥

ति तथा सूक्ष्ममपि चिदात्मतत्त्वं बुद्धियोगात् स्थूलप्रपंचात्मना भाति एवं यथा रूपं स्वमुखप्रतिबिंबं स्वरूपं स्वस्य मुखस्य तत्त्वं स्वदृश्ययोग्यमपि दर्पणः आलोचयते दर्शयति
८२ एवं केमेव प्रत्यग्वस्तु स्वाज्ञानकल्पितधीदर्पणाः प्राग्भूतविपदाद्याकारेणावभासयति तत्र यथा उपनेत्रदर्पणयोरुपाधेः क्रूरस्थौल्यमुखस्य दृश्यत्वं चापैति। एवं धीनि
ग्रहे चित्तः स्थूलत्वं दृश्यत्वं चापैति। न त्वेवं कूटस्थस्यात्मनो विकारित्वं सूक्ष्मस्थूलत्वे दृश्यस्य दृश्यत्वे च क्रमेणादृष्टांतत्रयं एवं चानादिरपि भ्रांतिस्तत्त्वज्ञानेन नतया श्वासे
नापि वाधितुं शक्या न च भ्रांतेरुन्मज्जनं संभवति बुद्धेरुत्पत्त्यपातित्वात् तस्मात् भ्रांतिज्ञानापनयाय आत्मज्ञाने यतितव्यमिति भावः २२ अष्टविंशः॥ ॥॥

१०

ननु यदुक्तं निर्विकारस्य विकारित्वं न स्मरणं स्थूलत्वं च दृश्यस्य दृश्यत्वं च बुद्धियोगादिति तन्न बुद्ध्यतिरिक्तस्यात्मनो नुपलंभादित्याशंक्याह यदीति। आत्मेंद्रियमनोयुक्तं भोक्तेत्या
हुर्मनीषिण इति श्रुतेः समनस्केंद्रियैरुपहितं यज्जीवचैतन्यं तत्तद्विषयवत्कालपरत्वात्पूर्वं ग्रामान्गुणान्विषयान्कालांतरे संस्मरते बाल्येहमिदमन्वभूवमिति तत्रा मनो
रथकाले विषयेंद्रियसंनिकर्षाभावाद्भ्रमाभावात् ज्ञेयज्ञानज्ञातृत्वाभावान्नास्ति तावद्बुद्धिरेव सर्वात्मतां प्राप्ता तदन्ये न चैतन्येनावभासत इति। अस्ति बुद्ध्यधिकश्चेतन इत्यर्थः ननु त
दा इंद्रियाण्येव विषयवासनावासितानि बुद्ध्यवकाशं न इत्याशंक्याह तेष्विति इंद्रियेषूपहतेषु विलीनेषु शब्दाद्यग्रहात् पश्चात्स्वप्नकाले बुद्धेः रूपं त्रिपुटीज्ञेयज्ञानज्ञा

मनुरुवाच यदिंद्रियैरुपलब्धं पुरस्तात् ग्रामान्गुणान्संस्मरते चिराय तेष्विंद्रियेषूपहतेषु पश्चात्स बुद्धिरूपः परमः स्वभावः ॥१॥

आत्मिकां तद्रूपमस्य स बुद्धिरूपः सन्मानः सत्त्वभौ लोकावनुसंचरति ध्यायतीव लेलायतीवेति श्रुतेः समानो बुद्ध्या तादात्म्यं प्राप्तः परमः सर्वोत्कृष्टः स्वभावस्त्विद्रूप आ
त्मा बुद्धेरन्योऽस्त्येव स्वरूपभावः यथा जाग्रत्काले घटचक्षुषोर्भास्यभासकयोर्व्यतिरिक्तः कूटस्थः निर्विकार आदित्यः सत्तामात्रेण चक्षुषोऽनुग्रहं घटस्य च प्रकाशं करोति
एवं स्वप्नेऽपि मानमेयात्मना स्थितां बुद्धिं तदन्यः उदासीनः प्रकाशोऽवभासयतीति तस्माद्यस्ति बुद्धेरन्यस्तत्तादात्म्यं भ्रांत्या विकारित्वाद्याक्रांत आत्मेति सिद्धं ॥१॥

न च मनोरथेऽश्वस्वप्नेऽपि वा मनोमयानीन्द्रियाणि सन्त्येवातस्तत्राप्यविशिष्टं बुद्धेरवभासकत्वं तथा च श्रुतिः स्वप्नावस्थां प्रकृत्याह अथो खल्वाहुर्जागरितदेश एवास्येति । न च स्वप्ने मना
गरूपत्वमिन्द्रियाणामसत्त्वेनुपपन्नं इन्द्रियैरर्थोपलब्धिर्जागरितमिति व्यवसिद्धेः अनेन मनोरथेऽश्वस्वप्नेऽपि बुद्धिरिति क्वचेतना तिष्ठत्त्वित्याशंका ह्यपास्तेति । सः परमः युगपदनेकका
लेष्वनल्पकालेष्वनेककालेषु च अतीतानागतवर्तमानपदार्थज्ञातं कृत्स्नं इह परत्र वा जन्मनि दृष्टं अविशेषात्समं तानप्यसमकृत्स्नान् तः सन्निधिर्येषां तान् असन्निहितानिन्द्रियार्थानिशत्र्यादी
न्नोपेक्ष्यते किं तु प्रकाशयत्येव पश्यतीह नो तथा चलं परस्परव्यभिचारि अवस्थात्रयं संचरते यतो विद्वान्साक्षी तस्मात्समाहत्तेभ्योऽनुवृत्ते भिन्नं कुशलमेभ्यः सत्त्वमिवेति न्यायात
एकस्यार्थः अयमर्थः स्वप्नावस्थायां हि अतीतानागतं वर्तमानं च ज्ञातं युगपदसन्निहितमिव दृश्यते न त्विन्द्रियाणां सत्त्वे तौ तादृशानेन स्यात्तत्र व्यतीत्यादिनाते षां सन्निकर्षे

यत्रेंद्रियार्थान्युगपत्समस्तान्नान्योपेक्ष्यतेऽनेककृत्स्नमनल्पकालं तथाचलं संच
रते स विद्वांस्तस्मात्स एकः परमः शरीरी २ ॥ ॥ ॥

रिति असन्निकृष्टज्ञाने न तदानीमिन्द्रियतद्भावकल्पना यथा न हि रज्ज्वादिषु विवाधिष्ठानज्ञानार्थं न हीन्द्रियापेक्षास्ति आत्मनो ह्युद्बुद्धेः विष्ठानत्वेनाभिमतत्त्वेन्द्रियायोग्य
त्वात तस्मात्स्वप्ने धीरैवेकामात्रमानमेयात्मना सतीन दृश्येन सा। क्रियाभासमनेन तस्याश्वावस्थात्रयं चलमिति अविशेषात् जागरेऽपि मैव मात्राद्याकारेति परिशिष्ट एव साक्षी
शरीरी। शरीरदर्शी निर्लेप इति श्रुत्यो रखन्विति श्रुतिस्तत्र स्वयं कृ विषयैर्वै इति श्रुत्यर्थविदां प्रसिद्धं अत्रमयात्मा पं प्रत्ययः स्वयं ज्योतिरितिस्वप्ने आत्मनः स्वयं ज्योतिष्ट्वज्ञापना
र्थं पञ्चत्वं स्वयं ज्योतिर्ब्राह्मणस्य निर्विषयत्वं स्पष्टमिति दिक् २

चलं संचरते इत्येतत् ह्याचेष्टत इति ॥ प्रत्येकं त्रिगुणात्मकानि नायद्दृहीनि बुद्धेः स्थानानि तेषां गुणानां तद्धनदुःखादीन् विरूपान् परस्परविलक्षणान् गच्छति ज्ञानात्मे
व न भुंक्ते अवस्थांतरगतस्य दुःखादेरत्यादर्शनात् । तथा चक्षुतिः सप्तत्तत्रय पश्यन्ति ऊर्णं चयायां वान वागतत्तेन भवन्त संगोत्थपंउ हृषइति ॥ अतो बुद्धेरेव दुःखा

रजस्तमः सत्वमथोन्नतीयं गच्छत्यसौ स्थानगुणान् विरूपान् ॥ तथेंद्रियाण्यपि विशनेश
रीरिकृताशनं वायुरिवेंधनस्थं ३ ॥

दिभोक्तृत्वं तत एव कर्तृत्वं न त्वात्मा भोक्ता कर्ता वा किंतु उदासीनबोधमात्र एवेत्यर्थः इममेवन्यायं इंद्रियसंघो प्यतिदिशति तथेति । अवस्थाय येनेव इंद्रियपथेनापि वु द्धेरेव
सुखादिभोक्तृत्वमर्थः अत्र दृष्टांतः कृतेति ॥ यथा काष्ठस्थोग्निरेव काष्ठं दहति न वायुः सत्वग्निंदीयपत्येवमेवं । इंद्रियस्थाधीरेंद्रियजं सुखादिकं भुंक्ते ॥ चिति स्कउ हिंचेन
पत्तेवन तनदीयं सुखादिकं भुंक्ते इत्यर्थः ३ ॥ ॥ ॥ ॥ ॥ ॥

एवंवुद्धेः पृथक्त्वहताधितमात्मतत्वंचक्षुरागोचरत्वाहनचक्षुषेति रूपंस्वरूपंचचक्षुषानपश्यति।स्पर्शनंत्वगिंद्रियंनपश्यतिरूपस्पर्शरहितत्वात्।नचहेतुःयतइंद्रियैरिंद्रियंशा
णस्यप्राणमुतचक्षुषश्चक्षुःश्रोत्रस्यश्रोत्रंमनसोयेनमनोविदुरितिश्रुतेरिंद्रियप्रकाशकंनेंद्रियप्रकाश[illegible]कंतयातीत्यर्थः नहिदाह्यदाहकोग्निर्दाह्यतत्त्वोभवति।इंद्रि
याणामितिपादेनिर्धारणेषष्ठी।इंद्रियाणांमध्येस्पर्शनंयत्तदपिनपश्यतीतियोज्यं श्रोत्रेणलिंग्यतेगम्यतइतिश्रोत्रगम्यमपिनश्रूयतेशब्दत्वात् एतच्चप्रमाणानांनयनाणामप्युपल
क्षणांकथंतर्हितस्यतत्त्वोपनिषत्सूछामीत्युपनिषद्गम्यत्वंदृश्यतेतत्रप्रपाठ्येतिधीगम्यत्वंचश्रूयतइत्याशंक्याह श्रवणेनदर्शनंतथाकृतमिति।तथा कथंयेनपश्यतीति

नचक्षुषापश्यतिरूपमात्मनोनपश्यतिस्पर्शनमिंद्रियाणां
नश्रोत्रलिंगंश्रवणेनदर्शनंतथाकृतंपश्यतितद्धिनश्यति ५

द्धिनश्यतीति।तच्छब्दयोगाद्येनेत्यध्याहार्यं अयमर्थः आत्मावाअरेद्रष्टव्यःश्रोतव्योमंतव्योनिदिध्यासितव्यइतिआत्मदर्शनार्थत्वेनश्रवणादिकंविधीयते।तत्रविदित
त्वंपदार्थस्यतत्त्वमसीतिवाक्यादात्मनोब्रह्मभावावगतौवेदांतैर्वेदांतैरितिवेदांतानामपिवाधः श्रूयते अमस्यनुवाक्यार्थध्यानेनतदवगतौमनसोपिलयः श्रूयतेताव
त्मनोनिरोद्धव्यंतद्धृदियावत्क्षयंगतमितितदिदमुक्तंयेनकरणेनशब्देनमनसावापश्यतिआत्मानंतद्धिनश्यतीति एवंश्रवणेनवेदांतवाक्यविचारेणआत्मनोदर्शनं
तथानाहदर्शनंप्रसत्तमितिसमस्तक्रियाकारकादिहेतंकृतंविहितं तथाचश्रुतिः यत्रत्वस्यसर्वमात्मैवाभूत्तत्केनकंपश्येदित्यादिः ४ ॥ ॥ ॥